# संस्कृत-वार्ता:

## 04/05/24

## सायम् - 06:20

<u>मुख्यवार्ता:</u>

- प्रधानमन्त्री भाजपेति दलस्य च वरिष्ठनेता श्रीनरेन्द्रमोदी प्रोक्तवान् यत् एनडीएसर्वकारस्य गतदशवर्षेषु पञ्चविंशतिकोटिजनाः निर्धनास्थितेः बहिरागताः।
- भारतीय-लोकसभानिर्वाचनं द्रष्टुं त्रयोविंशदेशानां पञ्चसप्तति-प्रतिनिधयः भारतं प्राप्तवन्तः।
- राष्ट्रपतिः द्रौपदीमूर्मूः हिमाचलप्रदेशस्य पञ्चदिवसीय-यात्रावसरे शिमलां प्राप्नोत्।
- स्नातक-चिकित्सा-कार्यक्रमेषु प्रवेशार्थं नीट द्विसहस्रविंशति इति प्रवेशपरीक्षा आदेशं श्वः आयोजयिष्यते।
- आईपीएल इति क्रिकेटस्पर्धान्तर्गतम् अद्य सायं रॉयल-चैलेंजर्स-बेंङ्गलुरु इत्यस्य दलस्य सम्मुखीकरणं गुजरात-टाइटंस इति दलेन सह भविष्यति।

<u>लोकसभानिर्वाचन-झारखंड</u>

लोकसभानिर्वाचनस्य अवशिष्टानां चरणानां कृते उच्चस्तरीयप्रचाराभियानं प्रवर्तते। प्रमुखराजनैतिकदलानां शीर्षनेतारः मतदातृन् लोभयितुं न कमपि उपायं परित्यजन्ति। भाजपेतिदलस्य वरिष्ठनेता प्रमाधमन्त्री च श्रीनरेन्द्रमोदी अद्य अपराह्णे झारखण्डस्य पलामू-गुलमा-जनपदयोः निर्वाचनसभां सम्बोधितवान्। श्रीमोदिना प्रोक्तं यत् एन.डी.ए-सर्वकारस्य शासनकाले विगतेषु दशवर्षेषु पंचविंशतिकोटिजनाः द्ररिद्रतावस्थातः बहिरानीताः। देशे सर्वकारेण संचाल्यमानाः निःशुल्कान्नयोजना आगामिपंचवर्षपर्यन्तमपि निरन्तरं एवमेव प्रचलिष्यतीति न कापि शक्तिः योजनामिमां स्थयितुं शक्नोतीति अपि च अस्मिन् सन्दर्भे मोदिनः प्रतिभूतिः गांरटी इति वर्तते। प्रधानमन्त्रिणा दृढतया प्रोक्तम्। मोदिना इदमपि कथितं यत् अस्माभिः सुनिश्चीतं अल्पधनाः जनाः अपि अन्तर्जालस्य प्रभूतम् उपयोगं कर्तुं समर्थाः भवेयुः इति अस्मिन् दिशि अस्माभिः कार्यं कृतम्। पूर्वं तु कांग्रेसशासनकाले केवलं धनिनः एव अन्तर्जालस्य उपयोगं कर्तुं समर्थाः आसन्। कांग्रेसदलेन आदिवासिजनपदानां नाशं कृत्वा तेषां दयनीयस्थितिः कृता। श्रीमोदिना झारखण्डमुक्तमोर्चा-कांग्रेसदल-नेतृभिः भ्रष्टाचारं कृत्वा स्ववंशजानां कृते प्रभूतं धनसंचनयं कृतमति मोदिना आरोपितम्। प्रधानमन्त्रिणा लोकतन्त्रे प्रत्येकं मतस्य महत्त्वं वर्तते इति कथितं, मतस्य कारणादेव जम्मूकाश्मीरेषु अनुच्छेदस्य त्रिसप्ततिः इत्यस्य समूलोन्मूलनं संजातमिति। पंचशतं वर्षणां संघर्षानन्तरं राममन्दिरनिर्माणं संजातं तत्रापि मतस्य एव महत्त्वमासीत्। अनेन सहैव असंख्यस्त्रीणां आशाः अपि मतकारणादेव पूर्तिं गताः तस्मादेव ताः उज्जवला-मुद्रा-आवासादि-विविध-योजनानां लाभं प्राप्तुं समर्थाः

जाताः। सम्पूर्णेनापि विश्वेन चतुर्दशाधिकद्विसहस्रतमवर्षे भारतीयप्रजातन्त्रस्य सामर्थ्यं बलं च जनमतेन एव द्रष्टम् अपि च अभिवादनमपि कृतमासीत्।

निर्वाचनप्रतिनिधयः

देशे लोकसभानिर्वाचनं द्रष्टुं त्रयोविंशदेशानां निर्वाचन-प्रबन्धन-निकायानां पञ्चसप्तति-संख्याकाः अन्ताराष्ट्रियागन्तुकाः भारतं प्राप्तवन्तः। उच्चतम-मानकानां कथं भारतीय-नैर्वाचनिक-आयोगः पालनं करोति अपि च कथं तदर्थं लोकतान्त्रिकप्रतिबद्धतां निभालयति इति एतादृशीं प्रक्रियां एते प्रतिनिधयः प्रत्यक्षतः निर्वाचनकार्यक्रमेषु पश्येयुः एतदर्थमेव ते अत्र आहूताः सन्ति। स्वयात्राकाले एते प्रतिनिधयः अद्यारभ्य आरभ्यमानेषु षडदिवसीय-कार्यक्रमेषु भागं ग्रहीष्यन्ति। निर्वाचननिकायेन प्रोक्तमस्ति यत् कार्यक्रमस्य उद्देश्यं वैदेशिक-निर्वाचन-प्रबन्धन-निकायाः भारतीय-नैर्वाचनिकप्रणाल्याः सूक्ष्मतया निरीक्षणं कुर्युः अपि च विश्वस्य वृहत्तमलोकतन्त्रे कथं नैर्वाचनिकप्रक्रिया सम्पन्ना भवतीति विषयेपि ते परिचिताः भवेयुः। श्वः मुख्यनिर्वाचनायुक्तः राजीवकुमारः ज्ञानेशकुमारः डॉ.सुखबीरसिंहसंधूः च एतान् वैदेशिक-प्रतिनिधीन् सम्बोधयिष्यन्ति। ततः परं एते प्रतिनिधयः विभिन्नराज्येषु जायमानेषु निर्वाचनेषु यथा महाराष्ट्र-गोवा-गुजरात-कर्नाटक-मध्यप्रदेश-उत्तरप्रदेशेषु गमिष्यन्ति। अयं कार्यक्रमः एतस्य मासस्य नवदिनाङ्के सम्पन्नो भविष्यति।

राष्ट्रपति द्रौपदी

राष्ट्रपति द्रौपदी मुर्मु हिमाचलप्रदेशस्य पञ्चदिवसीययात्रायै अद्य प्रातः शिमलानगरं सम्प्राप्तवती। शिमलासमीपे कल्याणी हेलीपैड् इत्यत्र अवतिरणे सती राज्यपालः शिवप्रताप-शुक्लः, मुख्यमन्त्री सुखविन्दरसिंह सुखुः च तस्या स्वागतं कृतवन्तौ। राष्ट्रपतिद्रौपदी मुर्मू इत्यस्मै अपि सम्मानरक्षकं दत्तम्। पश्चात् सा मशोब्रा-नगरस्य राष्ट्रपतिनिवासस्थानं द रिट्रीट् इति स्थलं प्रति प्रस्थितवती।

नीट –परीक्षा

राष्ट्रिय-परीक्षण-एजेंसी श्वः स्नातक-चिकित्सा-कार्यक्रमेषु प्रवेशार्थं राष्ट्रियपात्रता-सह-प्रवेशपरीक्षा नीट इत्यस्य आयोजनार्थं सर्वथा सज्जा वर्तते। एतस्मिन् वर्षे आदेशं सप्तपंचाशदधिकपंचशतनगरेषु भारतात् बहिश्च चतुर्देशनगराणां विभिन्नकेन्द्रेषु चतुर्विंशत्यधिकप्रतिभागिनः परीक्षायां सम्मिलिताः भविष्यन्ति। परीक्षा भारतीयसमयानुसारं मध्याह्ने द्विवादनतः सायं विंशत्यधिकपंचवादनं यावत् भविष्यति। परीक्षकसंस्थया एनटीए इत्यनया प्रोक्तं यत् परिक्षार्थम् आत्मना सह स्वीयप्रवेशचिटिकां परिचयपत्रं छात्राचित्रमादिकं सहैव नयेयुरिति। एतादृशं विववरणं परीक्षाकाले परिचयादिसत्यापनार्थम् अनिवार्यमस्ति। यदि कस्यचित् परीक्षार्थिनः प्रवेशचिटिकायां वारकोटसहितविभिन्नपरिचयं विवरणं एकदा न मुद्रितं भवति तर्हि सः परीक्षार्थी पुनः वेबफलकात् पुनः स्वीयप्रवेशचिटिकां निष्कासयेत्। परीक्षार्थिनः एतस्मिन् विषये अपि

संसूचिताः यत् ते परीक्षाकालात् पूर्वमेव परीक्षाकेन्द्रे प्राप्नुयुः येन परीक्षापूर्वसर्वविधौपचारिकताः सकुशलं यथाकालं च सम्पादिताः स्युः।

केन्द्र-पलाण्डू

केन्द्रेण अद्य पलाण्डू इत्यस्य निर्याते प्रतिबन्धः अपसारितः। विदेशव्यापारमहानिदेशालयेन संसूचितं यत्, प्रतिमेट्रिकटनं इत्यस्य न्यूनतमनिर्यातमूल्यं सार्धं पञ्च शतं अमेरिकीडॉलरात्मकं शुल्कापसारणादेशः तत्क्षणमेव प्रभावी भविष्यति। विगतमासे केन्द्रेण षट् देशेभ्यः बाङ्गलादेशः, यूएई, भूटान, बहरीन्, मॉरिशस, श्रीलङ्का च देशेभ्यः नवनवति सहस्राधिकमेट्रिकटनपर्यन्तं पलाण्डू इत्यस्य निर्यातस्य अनुमतिः प्रदत्ता आसीत्। पश्चिम एशियायाः केषाञ्चन यूरोपीयदेशानां च निर्यातविपण्यस्य कृते विशेषतया उत्पादितस्य श्वेत पलाण्डू इत्यस्य द्विसहस्रमेट्रिकटनस्य निर्यातस्य अपि अनुमतिः सर्वकारेण प्रदत्ता।

लोकसभानिर्वाचन-चतुर्थचरण

लोकसभानिर्वाचन-चतुर्थचरणस्य दशराज्यानां केन्द्रशासितप्रदेशानाञ्च सप्तशताधिकप्रत्याशिनः निर्वाचने भागं गृह्णन्ति। तत्र तेलगांनाराज्ये उपचतुर्दशशतं प्रत्याशिनः नामाङ्कनं पूरितवन्तः, ततः परं आन्ध्रप्रदेशः द्वितीयस्थानं वर्तते अपि च तेलंगानामध्ये मल्कागिरिनिर्वाचनक्षेत्रे अधिकं सप्तत्यधिकशतं नामांकनानि प्राप्तानि सन्ति।

आईपीएल

आईपीएल इति क्रिकेटस्पर्धान्तर्गतम् अद्य सायं रॉयल-चैलेंजर्स-बेंङ्गलुरु इत्यस्य दलस्य सम्मुखीकरणं गुजरात-टाइटंस इति दलेन सह भविष्यति। ह्यः सायंकाले मुम्बई-नगरे कोलकाता-नाइटराइडर्स इति दलेन मुम्बई-इण्डियन इति दलं चतुर्विंशतिधावनैः पराजितमासीत्।

।। इति वार्ताः ।।